महादेव [illegible] 3/16

॥श्रीसिद्धेश्वरी विजयते नत्वा शिवं शिवायुक्तं महादेवेन धीमता उपाध्युक्तिपत्रे व्याख्या भवानन्दगिरां स्फुटा इति॥ अनेन प्रकारेणोक्तोर्थः प्रयोजनायां
उपोद्घातलाभाय मिश्रैरुक्ताप्रयोजनायां ननु मूले यथाश्रुतयोजनयैव व्याप्तिनिश्चयप्रतिबंधकव्यभिचारज्ञानसंपादकज्ञानविषयत्वस्योपाधौ ला-
भे प्रतियोगितानविधया स्वज्ञानजन्यस्वाभावज्ञानप्रयोज्यव्यभिचारज्ञानाभावसंपादनद्वारा व्याप्तिनिश्चयप्रयोजकत्वस्यार्थतो लाभेन व्याप्तिनिश्च-
यप्रयोजकत्वरूपोपोद्घातलाभे मिश्राणामप्रयोजनानुसरणमफलमिति चेन्न तथा सति घटादेरपि व्यभिचारव्याप्यत्वग्रहे तादृशज्ञानविषय-
त्वसंभवेन निरूपणीयतापत्त्या तद्व्यावृत्तोपोद्घातलाभायाप्रयोजनानुसरणस्य फलत्वात् एतेन व्याप्तिनिरूपणानंतरं व्याप्तिरूपैकसंबंधिज्ञानात्त-
निश्चयप्रतिबंधकव्यभिचारज्ञानसंपादकज्ञानविषयत्वेन स्मृतस्योपाधेरुपेक्षानर्हत्वेनोपेक्षानर्हतावच्छेदकतादृशज्ञानविषयत्वरूपप्रसंगेन य-
थाश्रुतयोजना ~ म्येनोपाधिनिरूपणसंभवेऽप्रयोजनाक्लेशेनोपोद्घातानुसरणमपि मिश्राणामफलमिति शंकापि निरस्ता तथा सत्युक्तरीत्या घटा-
देरपि निरूपणीयतापत्तेः न चाप्रयोजनायामपि कथं घटादिव्यावृत्तोपोद्घातलाभः व्यभिचारे उपाधिव्याप्यत्वग्रहे व्यभिचारज्ञाने सति उपाधिज्ञा-
नस्येव व्यभिचारे घटादिव्याप्यत्वग्रहे व्यभिचारज्ञाने सति घटादिज्ञानस्यापि संभवादिति वाच्यं अप्रयोजनायां व्याप्याभूतव्यभिचारज्ञानस्य व्याप-
ज्ञानविषयव्यापकीभूतोपाधिज्ञानजनकत्वलाभेन तत्सोपाधौ व्यभिचारव्यापकतालाभेनोपाध्यभावस्य व्यापकाभावविधया व्याप्तिनिश्चयविषय- या१

व्यभिचाराभावरूपव्याप्तिसंपादकत्वाभेनोपाधेश्च स्वज्ञानजन्यस्वाभावज्ञानेन व्यापकाभावे संयेत्तिद्वाराव्याप्यव्यभिचाराभावरूपव्याप्तिनिश्चयप्रयोजकत्व
स्यार्थतो लाभे नैतादृशप्रमाणस्य व्याप्तिनिश्चयप्रयोजकत्वरूपस्य घटादिव्यावृत्तो पोद्घातस्य लाभसंभवात् न चोक्तरीत्या घटादिव्यावृत्तप्रसंगे नैवो
पाधिनिरूपणासंभवेपि आरणातमरिणागे किंबीजमिति वाच्यं अन्यथा योजनाया आवश्यकत्वेंतरंगस्योपोद्घातस्यैव संगतित्वसंभवे बहिरंगप्रसंगपरित्याग
स्यैवोचितत्वादिति मिश्रनिगर्वः आमाणिकं गौरवं न दोषायेत्यत आहन्यामीति असंगतत्वादिति उपाधिज्ञानस्य व्याप्तिनिश्चयाप्रतिबंधकत्वादिति भावः उपोद्घा
तस्य मिश्रसंमतो योद्घातस्य ननु यथाश्रुतयोजनया व्याप्तिनिश्चयप्रतिबंधकव्यभिचारज्ञानसंपादकज्ञानविषयत्वरूपप्रसंगस्यैव लाभेन तस्योक्तरीत्या घ
टादिसाधारण्यात तस्यापि निरूपणीयतापत्तिरत आह तत्सर्वथेत्यादि केचित्तु उपाधिसंदेहे न सर्वत्र व्यभिचारसंदेहसंभवेन व्याप्तिनिश्चयो दुर्घट इति
कारणाभावादनुमानमप्रमाणमित्युक्तवंतं चार्वाकं प्रति कार्यादिकस्य कारणाधीनस्य उपाधितानस्य तदधीनव्यभिचारज्ञानस्य चासार्वत्रिकत्वात्तदभावदशा
यां व्याप्तिनिश्चयो न दुर्घट इत्युत्तरितं तत्र सर्वमुपाधिनिरूपणं विनापि निर्वहतीति यथा श्रुतमूलस्वरससिद्धोपोद्घातसंगतिर्न संभवति अन्यथा योजनया
मिश्रोक्तोपोद्घातसंगतिरपि कल्पनागौरवादिदोषग्रस्तेत्यालोच्य दीधितिकारेण प्रसंगसंगतिपरतयोपाधिज्ञानादिसाधारण्यसंभवावतारणमिति विवदंति दीधितौ निरूप
यितुं निरूपणां कर्तुं धात्वर्थनिरूपणे द्वितीयांतार्थस्योपाधिकर्मकत्वस्यान्वयः आह प्रसंगानुकूलं पूर्वं निरूपितव्याप्तेः स्वनिश्चयाभावप्रयोजकीभूतव्यभिचारज्ञा

नकारणाज्ञानविषयत्वरूपंसंबंधमुपाधावाहेत्यर्थःसोपाधौसिद्धिकर्मत्वसिद्धिकरणत्वरूपसाध्यत्वसाधनत्वयोर्नसंभवइत्यतआहव्याख्यायांसाध्यत्वेतिव्याप्यत्वे
तिअल्पाच्तरत्वाद्व्याप्यत्वस्यपूर्वनिपातःउक्तरूपसाध्यत्वसाधनत्वयोर्विवक्षितादिवेकेनव्याप्यत्वव्यापकत्वयोःपर्यवसानादितिभावःअभिमानस्यभ्रमस्यविशेषणा
त्वइतिउपलक्ष्यतावच्छेदकरूपाज्ञानादन्यस्यगणस्यउद्देश्यतापत्त्योपलक्षणत्वासंभवादितिभावःसर्वत्रनियमेनाभिमानकल्पनान्नदोषइत्यतआहसाध्यतावच्छे
कादीनामिति आवश्यकत्वइतिअन्यथासर्वस्यैवयत्किंचिदभिमानविषयत्वेनाभिमतानांतस्याव्यावर्त्तकत्वापत्तिरितिभावःदीधितौसतत्रेतितदवच्छिन्ननिरूपितस
तदवच्छिन्ननिष्ठस्यव्यभिचारस्योन्नायकइत्यर्थःएकस्यैवरूपपदस्यप्रकारसंबंधोभयपरत्वमित्याशयेनाहव्याख्यायांएकप्रकारेणेति नचात्राभेदस्यतृतीयार्थत्वेएकसं
बंधेनेत्यत्रान्वयःअवच्छिन्नत्वस्यतृतीयार्थत्वेचएकप्रकारेणेत्यत्रान्वयइतिवाच्यं भेदाभेदसाधारणघटितत्वस्यतृतीयार्थत्वेनोभयत्रान्वयोपपत्तेःअभिमानघटितत्व
व्याप्तत्वलक्षणासाधारण्यायाहधूमवानितिअप्रसिद्धेरितिअसंभवादित्यर्थःव्यभिचारित्वाव्याप्यत्वसंबंधावच्छिन्नप्रतियोगिताकोपाधिव्यापकाभावरूपानौपाधि
कत्वंविहाययावदुपाधिव्यापकव्यापकत्वरूपानौपाधिकत्वपरिग्रहेणाम्भोव्याप्रयोपयादनैर्बीजमाहधूमवान्वन्हेरित्यादितत्सामग्रीरूपोपाध्यभावघटितंनिरुक्तोपा
ध्यभावरूपानौपाधिकत्वज्ञानंयावदुपाधिव्यापकेसाध्ये अत्रानौपाधिकत्वशरीरेसाध्यव्यापकत्वस्यैवनिवेशोदीधितावव्यापकत्वनिवेशःप्रकृताभिप्रायेणउपा
धेःसाध्यनिष्ठव्याप्तिनिरूपकत्वेसाध्यस्योपाधिव्याप्यत्वपर्यवसन्नेउपाधेरेवसाध्यत्वादितिध्येयंयावत्त्वव्यभिचारीसाधनेोपाधित्वांतरपरित्यागेबीजमाहयावत्

व्या० पं०
२

व्यभिचारित्वादिनाऽऽरूपेतिव्याचष्टेव्यभिचारित्वादिरूपेणेत्यर्थः अन्योन्याश्रयमुपपादयति धूमनिष्ठत्वादिनेति तत्रापि यावदार्द्रेन्धनेसाध्यव्यापकत्वज्ञानेऽपि तन्निरूप
कत्वेति आर्द्रेन्धननिष्ठनिरूपकत्वेऽसत्यर्थः तद्व्याप्तीति आर्द्रेन्धनव्याप्तीत्यर्थः एवमग्रेऽपि तद्व्याप्तिनिरूपकत्वं धूमनिष्ठव्याप्तिनिरूपकत्वं नान्योन्याश्रय इति यद्यपि अन्यो
न्याश्रये चक्रकेवान्योन्याश्रयोऽप्यस्त्येव तथापि स्वरूपस्य व्यवधानेऽन्योन्याश्रयः द्वयोर्व्यवधाने चक्रकं व्यवधानाभावे आत्माश्रय इति विवक्षा नेहाद्वैदेदसाशयेनेदं
मतांतरमिति। एतन्मते च व्यभिचारित्वाव्याप्यत्वसंबंधावच्छिन्नप्रतियोगिकोपाधिव्यापकाभाववत्वमेवानौपाधिकत्वं यत्रेति तथा चैतन्मते प्रकृते सर्वमेव व्याप
कत्वं व्याप्तिनिरूपकत्वस्वरूपमिति भावः उपाधिव्यापके सत्युपाधिव्यापकाभावरूपानौपाधिकत्वशरीरांतर्गतोपाधिव्यापकत्वेऽसंभवादिति व्याप्तेर
प्रवेशादिति भावः उपाधिव्यापके साध्ये यावदुपाधिव्यापकव्यापककत्वरूपानौपाधिकत्वशरीरांतर्गतोपाधिव्यापकत्वेऽप्रमादर्शेति तद्न्निष्ठत्वादिरूपेणेत्यर्थः
अपरिहारादिति व्याप्तिनिरूपकत्वरूपस्याद्वितीयव्यापकत्वस्य प्रवेशादिति भावः अत एव स्वमते प्रकृते सर्वस्य व्यापकत्वस्य व्याप्तिनिरूपकत्वस्वरूपत्वाभा
वदेव अप्रसार्थेति अनवस्थाया अन्योन्याश्रयस्य च दार्थत्वाभावादिति भावः दीधितौ अव्याप्यवृत्तीनां व्यापकत्वमिति द्रव्यं सत्वादिसाध्यसद्धेतौ संयोगादीनां साध्य
व्यापकत्वं द्रव्यं गुणात्मे योभिधेयत्वादिसादिसद्धेतौ संयोगादीनां संयोगाभावादीसाधनव्यापकत्वं चेत्यर्थः उपपादयतुमिति उपपादनप्रकारं त्वासद्धेतौ नव्या
प्युपाधित्वसंपादनं सद्धेतौ चानुपाधित्वसंपादनमिति भावः आह अव्याप्यवृत्तित्वादावृत्तेः प्रतियोगित्वमाह व्याख्यायां तदधिकरणावृत्तित्वमिति वृत्तित्वेउपाधि

राम०
२

त्वासंभवादिति भावः अत्र जन्यं द्रव्यत्वादिसाध्ये गगनान्यत्वादेर्द्रव्यत्वादिसमानाधिकरणगगनात्वाभावाद्यधिक २

वं

ताघटकसंबंधेसमान्वयः संबंधभेदेऽप्याधिताघटकसंबंधामसंबंधं आमासेरिति आर्द्रेंधनादेरपि वन्ह्यादिसमानाधिकरणार्द्रेंधनाभावाद्यधिकरणेकालादौ
कालिकादिसंबंधेनवृत्तितयासाधनाव्यापकेरणगगनादौसंबंधसामान्येनैवावृत्तितयासाधनाव्यापकत्वसंभवेनासंभवासंभवादव्याप्तेरित्युक्तं द्रव्यत्वाद्यभा
वेति नचसंयोगाभावाधिकरणगुणादिवृत्तित्वस्यसंयोगेसत्वाद्द्रव्यसंयोगस्यसाधनाव्यापकत्वसंभवेद्रव्यत्वाद्यभावपर्यंतानुधावनमफलमितिवाच्यं द्रव्यगु
णादिसादौसंयोगीभावाधिकरणगुणावृत्तित्वस्यसंयोगेसत्वेनसाधनाव्यापकतापत्तात्तदधिकरणवृत्तित्वसामान्याभावस्यैवनिवेशनीयतयासंयोगाभावा
धिकरणाद्यवृत्तित्ववतिसंयोगेसंयोगाभावमादायसाधनाव्यापकत्वासंभवात् नचैवंसत्तासमानाधिकरणसंयोगाभावाधिकरणाद्यवृत्तित्ववतिसंयोगे
सत्तासमानाधिकरणाभावाधिकरणावृत्तित्वसामान्याभावो दुर्घटत्वः एवेनि वाच्यं व्यतिरेकिमात्रस्यैवतादृशगगनाद्यभावाधिकरणावृत्तित्वेनासंभवापत्त्यासा
धनसमानाधिकरणधर्मेणायत्किंचिदभावाधिकरणावृत्तित्वसामान्याभावस्यैवनिवेशेनादोषात नन्वपाधिताघटकसंबंधेन तदधिकरणावृत्तित्वमुपाधिता
घटकसंबंधेतदधिकरणानुयोगिकत्वप्रतियोगिकत्वोभयाभावरूपं वाच्यं तथा च जातिमान्भेयत्वादिसाध्यकगुरुत्वशीलास्तन्नाहेनाव्याप्तिरतआह एवमिति विशि
ष्टसत्वसगुणाकर्मान्यत्वविशिष्टसत्वस्यगुणादाविति सत्तासमानाधिकरणविशिष्टसत्ताभावाधिकरणेसादिः नचोक्तदोषेणसाधनाव्यापकत्वशरीरेप्र
तियोगित्वस्यतदधिकरणावृत्तित्वस्वरूपत्वासंभवेपि साध्यव्यापकत्वशरीरेतस्यतत्स्वरूपत्वे बाधकाभाव इति वाच्यं तथा सति द्रव्यसत्वादिसाध्येपृथिव

भा॰ प्र॰
३

त्वम्पविशिष्टद्रव्यत्वाद्यवतियात्मेः तादृशत्वाद्यभाववतिपृथिव्यादौ विशिष्टस्यानतिरेकेण तादृशद्रव्यत्वादेर्वृत्तित्वेन साध्यसमानाधिकरणाभावाप्रतियो
गित्वात्स्वसत्तासमानाकरणाशुद्धद्रव्यत्वाद्यभावाधिकरणावृत्तित्वेन साधनाव्यापकत्वस्यापि सत्वात् प्रतियोगीत्वविशेषणं स्वरूपसंबंधरूपप्रतियोगित्ववि
शेषणं तदधिकरणाधिकरणाधिकरणात्मकस्य तदधिकरणवृत्तित्वासामानाधिकरण्यपरूपत्वेऽक्तदोषनिरासासंभवादाह तदधिकरणे ज्ञायमानमि
त्यादि तदधिकरणाइत्यस्याभावाधिकरणाइत्यर्थः यदधिकरणत्वमिति समानाधिकरणान्ननुज्ञाप्यमानत्वयोर्बोधकपदाभावात्कथं दृशाभिमतत्याह सम
न्नेति प्रतियोगित्वस्य स्वरूपतो विरोधित्वाभावादाह विरोधित्वं चेति अभावाधिकरणे यत्किंचिदधिकरणत्वं ज्ञाने प्रतियोगित्वज्ञानस्य विरोधित्वादाह या
दृशप्रतियोगित्वज्ञान इति नचैतदभाववत्ताज्ञानस्यैतदधिकरणत्वग्रहप्रतिबंधकतया प्रतियोगित्वज्ञानस्य कथं तत्प्रतिबंधकत्वमिति वाच्यं तद्धर्मावच्छिन्न
वत्ताग्रहे तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानस्य प्रतिबंधकतया तस्यैव प्रतियोगिताज्ञानात्मकत्वात् एवं च यादृशप्रतियोगिताकाभाववत्ताज्ञान
स्यानिरुक्तप्रतिबंधकता तत्वमिति पर्यवसितमिति ध्येयं यदधिकरणेऽभावाधिकरणे प्रतियोग्यधिकरणात्वेति स्वावच्छेदकावच्छिन्नप्रतियोग्यधिकर
णत्वे स्यार्थः स्वं यादृशप्रतियोगिता तेन सममपि प्रतियोगित्वज्ञाने भावाधिकरणरूपान्तरेणाप्रतियोग्यधिकरणत्वग्रहे पि न दोषः फलितार्थ इति अत्र सं राम॰
योगप्रतियोगिताकाभाववत्ताज्ञानस्य गुणादौ संयोगात्वाधिकरणत्वग्रहप्रतिबंधकतया इष्टेचेतद्धताप्रतिबंधकतयाऽव्याप्तसत्वात् द्रव्यं गुणा[illegible]दिमादौ संयोग ३

नाप्राप्तिव्याप्ती एवमाश्रयासिद्ध्यादोषनिरासो ध्येयः अत्राभावाधिकरणविशेष्यकत्वावच्छेदकावच्छिन्नप्रतियोग्यधिकरणत्वग्रहप्रतिबंधकतानिरूपि
तविषयितासंबंधावच्छिन्नावच्छेदकताश्रयीभूतं प्रतियोगित्वमिति निष्कर्षः तेन निरुक्तप्रतियोगित्वस्य न विशिष्टैकार्थरूपत्वानुपपत्तिरिति ध्येयं ॥ इदंबो
ध्यं अत्र साध्यसमानाधिकरणाभावेय यदधिकरणाधिकरणत्वं साधनसमानाधिकरणप्रतिबंधकाभावे च यदधिकरणाधिकरणत्वाभावस्तत्प्र
पाधित्वमित्याशयेनैव प्रतियोगित्वं चेत्यादिमूलसामंजस्ये दीधितिकारस्य विरोधित्वादिघटितलक्षणाकरणमसमंजसमेवेति प्रतियोगितावं
छेदकसंबंधेनेत्यादिनच निरुद्धानत्ववान्मेयत्वादित्यादौ विषयितासंबंधेन घटपाद्यव्याप्तिः विषयितासंबंधस्य वृत्त्यनियामकतया प्रतियोगि
वच्छेदकत्वाभावेन विषयितासंबंधावच्छिन्नत्वाप्रसिद्धेरिति वाच्यं प्रकारतादेस्तत्प्रसिद्धेः प्राचां विषयितादेर्वृत्त्यनियामकसंबंधस्याप्यभावप्रतियोगिता
वच्छेदकत्वात् विशेषणात्पाद्यघटामतादेरेवोपाधित्वसंभवेन विषयितायाव्यापकत्वाघटकत्वे तेन संबंधेन घटादेरूपाधित्वानंगीकाराच्च यत्‌रूपाधिताघ
टकसंबंधसामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वं साध्याधिकरणवृत्तिविशिष्टस्यानुयोगिकत्वोभयाभावस्तादृशप्रतियोगित्वमे
वप्रतियोगित्वांतार्थ इति निष्कर्षः तेन कालपरिमाणवान् द्रव्यत्वादित्यादौ कालिकसंबंधेन घटादावुभयाधेर्न संग्रहः कालिकसंबंधेनाद्वृत्तिगगनादेस्तादृशप्रति
योगित्वप्रसिद्धेरिति तन्विंत्यं स्वरूपसंबंधेन गगनादेर्वृत्तिमत्वे निस्तारात् यत्र यत्र इत्यत्र तथा च हेतुः प्रमेयोविभुत्वादित्यत्र पक्षधर्मवह्निद्रव्यत्वावच्छिन्नप्र

समस्तत्वव्यापकमुमुक्तरूपवत्त्वविमुक्तावच्छिन्नसमस्तत्वव्यापकमात्मत्वंचासंकीर्णमुपाधिद्वयमितिभावः सर्वनामकार्येस्मिन्नादेशेऽभावप्रधानइतीति अत्रब
हुव्रीहिसमासनिष्पन्नपक्षेतरपदंपक्षेतरत्वपरंतुसमस्यमानेतरपदमितरत्वपरं अनन्वयापत्तेः तथाचपक्षपदस्यतात्पर्यग्राहकतयाइतरशब्द
स्यपक्षनिष्ठभेदप्रतियोगित्वेलक्षणेतिभावः भावप्रधाननिर्देशाद्वेतितथाचपंचमीतत्पुरुषसमासनिष्पन्नपक्षेतरपदस्यपक्षेतरत्वपरतयापक्षप
दस्यतात्पर्यग्राहकत्वेनभेदपरत्वेऽतेतरपदस्यपक्षभेदेलक्षणेतिमिश्रमतमेवसमीचीनमितिभावः सर्वनामकार्याभावइतिअर्थांतरसंकेतितसर्वादेःस
र्वनामत्ववारणायशक्यास्वार्थोपस्थापनएवसर्वनामत्वांगीकारादितिभावः असंगतंवृथाअर्थांतरोपस्थापनेपिस्वार्थातिरिक्तार्थोपस्थापनेपिअ
भिनाशक्यास्वार्थोपस्थापनसमुच्चयःसंभवादितिअन्यथालाघवेनजातिमात्रशक्यतावच्छेदकत्वहानिः द्विपदेपव्यादिपदेसर्वनामत्वानुपपत्तेरितिभावः
तथात्वेपिसर्वनामकार्यसंभवेपिनिषेधानुशासनेतिनबहुव्रीहाविसनुशासनेत्यर्थः नचैवंशक्तिप्रयोज्यार्थोपस्थापनेसर्वनामत्वांगीकारेतिसर्वापेत्या
दानुपसर्जनीभूतसर्वादेरपिसर्वनामत्वंदुर्वारमितिवाच्यं नबहुव्रीहाविमत्रबहुव्रीहिशब्दस्योपलक्षणतयासमासादिमुपसर्जनीभूतसर्वादेःसर्वनामत्वनिषेधोऽनु
शासनसिद्धइत्याशयात दीधितौपक्षमितरयतीसादितथाचेतरत्वरोतीसमर्थेतिजंतेतरशाद्योनरहत्समसमासांतप्रत्ययसतरमेवेदमितिसर्वादिगणांतर्गतत्वादेव
नसर्वनामत्वमितिभावः व्याख्यायामसंगतिरितिस्यपर्वतादिनिधर्मात्वस्याश्रयतद्रूपोपाधिनाघटत्वसंबंधावच्छिन्नप्रतियोगिताकोपाध्यभावानामकत्वेत्या

दिःस्यादिति अथ यथा पर्वतेतरान्मत्वस्योक्तोपाध्यभावानात्मकतातादवस्थ्यापाताद् इति भावः अननुव्यापकताभावस्यैव गमकतया भावप्रधाननिर्देशोयम् अतेपि पर्वतेतरान्
त्वस्य निरुक्तोपाध्यभावानात्मकतया कश्चिद् इति अन्वयस्य ममत्वासंगतिरित्याशयेनाह भावप्रधानेति आवश्यकत्वे इति अथ यथा सर्वनामकार्यापत्तेरिति भावः पर
मार्थत्वेउपष्टंभकमाह हरीधितावत एवेति साधिस्मने नोक्तं एतत्कथं संगमनसाधुत्वमुपपादयति आख्यापांपर्वतेतरस्येति नचैवं तत्कमस्य उपाध्याभासनिरू
पणोअप्रसिद्धसाध्यविपर्ययो यथा केवलान्वयिपक्षेतरत्वादित्स्वयि अमूलग्रंथानुरोधात् भावप्रधाननिर्देशो पिमूलानिरोतइतिहृदि निधायाह हीधितौ सर्
यादिति इत्थंचकश्चिदिति पूर्वोक्तमतमपि सम्यगिति ध्येयं व्यापकाभावस्यैवेति यथा व्यापकासंताभावस्य व्याप्याभावगमकत्वं तथा व्यापकवदन्योन्याभावस्या
पि अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपतया तस्यापि साध्याभावव्यापकीभूताभावप्रतियोगितारूपव्यतिरेकव्याप्तिमत्त्वसंभवाद् इति भावः ननु लघोर्व्याप
कासंताभावत्वस्यैव व्याप्यतावच्छेदकतया गुरोर्व्यापकवदन्योन्याभावत्वस्य व्याप्यतानवच्छेदकतया व्यापकवदन्योन्याभावस्य न व्याप्याभावगमकत्वं संभवतीसत आ २४
ह आश्रितेति गुरोरपि व्याप्यतावच्छेदकत्वांगीकाराद् इत्याशयः मूलेऽनित्यत्वेप्येवेति अत्र पक्षेतरस्य वक्ष्यमाणगसासाध्यव्यापकताभावेन वस्तुतिव्याप्तेरभावेपि साध्यव्या
पकत्वात्मकदूषणोपयिकरूपज्ञानानतिव्याप्तिपरोयं ग्रंथ इति वक्तव्यः मान्यात्विनेदं सम्यक् तथा सत्युक्तरूपज्ञानानतिव्याप्तिविचारणाया अविशेषवराहनस्यानौचि
त्यात्तदोषाधीनज्ञानातिप्रसंगस्यैकेनापि प्रकारेणावारयितुमशक्यत्वाच्च किंतु पक्षेतरस्य साध्यव्यापकत्वे प्रमाणाभावाद् एव साध्यव्यापकत्वासिद्ध्या वस्तुतिव्याप्ति

परएवायंग्रंथः अतएव प्रगल्भेनापि साध्यव्यापकत्वेययोर्व्यतिरेक इत्यादिनियमरूपप्रथमाराससत्वान्नातिव्याप्तिरित्यभिप्रायेणो व्यतिरेक इत्याद्यग्रिमग्रंथो व्याख्या
तः नचैवंमूलेव स्तुगत्यासाध्यधर्मव्यापक इत्यादिनाज्ञानातिव्याप्त्युद्धारशंका या असंगतिरिति वाच्यं तस्याः पक्षे साध्यनिश्चयदशायामेव साध्यव्यापकत्व प्रमा
रासत्वेन वस्तुतिव्याप्त्युद्धारतात्पर्यकत्वादिति प्राहुः पक्षेतरव्यतिरेकस्यव्यर्थविशेषणतया साध्याभावासाधकत्वेन व्यतिरेके साध्याभावानुमानदूषकव्यर्थविशेष
णताराहित्य विशेषणतासत्वेन पक्षेतरातिव्याप्त्युद्धारपरो व्यतिरेक इत्यादिमूलग्रंथ इत्याशयेनाशंकते दीधितौ यद्यपीति व्याख्यापाव्यर्थविशेषणत्वंहीति व्य
भिचारावारक विशेषणाघटितत्वं हि व्यर्थः घटकविशेषणानि च वैयर्थ्यमिति यावत् तद्विशेषणानावच्छेदेन ताद्दशविशेषणघटित धर्मावच्छेदेन चकिंचित्करं अति
व्याप्त्युद्धारासंपादकं पर्वतांशस्य वैयर्थ्यं व्यभिचारावारकत्वरूप वैयर्थ्यं दीधितौ दोषाय प्रतिबंधायरूपं चागमकत्वं दूसनेनान्वितं तथा च साध्याभावानुमितिज
नकज्ञानप्रतिबंधकत्वरूप साध्याभावानुमानदूषकत्वस्य वैयर्थ्ये भावेन विशेषणाभावप्रयुक्त विशिष्टाभावसत्वाउक्तविशेषणेन न पक्षेतरातिव्याप्त्युद्धार इ
तिशंकातात्पर्यं व्याख्यायां अनुमाने तिसाध्याभावानुमाने स्पष्टः वास्तवे तीवास्तवत्वं च साध्याभावानुमानदूषकत्वरूप विशेषणानवच्छिन्नत्वं तत्याच के वे
नायाव्यतिरेके व्यर्थविशेषणतानन्तर घस्पत्वरूपविशेषणहानेन पक्षेतरातिव्याप्तिवारणपरो व्यतिरेक इत्यादिमूलग्रंथ इति समाधानतात्पर्यं व्यतिरेकनिष्ठ
अर्थविशेषणताभ्रमत्वस्य व्यतिरेकमिश्रेष ईश्वरत्वेना आवर्तकत्वे सत आह यद्व्यतिरेकत्वमिति वह्निमातादिशा कृहादि वृत्तित्वविशिष्टपर्वतेतरादावतिप्रसंगवारणा

यन्न जलह्रदपक्षकं नच स्वाघटेनेंधनाभाववत्त्वस्यैव धूमाभावव्याप्यतावच्छेदकतयाऽऽर्द्रेंधनव्याप्तिरिति वाच्यं इंधनाभावार्द्रेंधनाभावयोर्भिन्नतया भिन्नधर्मिकत्वे
नार्द्रेंधनाभाव [redacted] तस्यापि व्याप्यतावच्छेदकत्वात् अत्र साध्याभावव्याप्यतानवच्छेदकविशेषणाघटितस्वाभावकं यत्साध्यव्यापकत्वं
रूपत्वे सत्यतात्पर्यं तेन न विशिष्टैकार्थरूपत्वानुपपत्तिः विशेष्यसाध्यव्यापकत्वसार्थक्याय भेदप्रतियोगिकोटौ साध्यव्यापकत्वनिवेशः केचित्तु व्यतिरेकह्र
दादिमत्त्वं पक्षेतरस्य सत्त्वाति पक्षोऽव्यापकत्वरूपदूषकताबीजाभावादनुपाधित्वकथनेनातिव्याप्तिवारणापर्यंतत्वासंगतं दूषकताबीजाभावस्यालक्ष्यत्वनि
र्णायकत्वेनातिव्याप्तेरेवानुकूलत्वादित्याशयेनाशंक्य दीधितौ यद्यपीति गमकत्वे साध्याभावसाधकत्वे तथा वैयर्थ्यं दूषकताबीजाभावोपपादकवैयर्थ्यं निर्दे
शायनातिव्याप्तिप्रातिकूल्याय परंतु तादृशव्याप्तावानुकूल्यायैवेति शेषः तथापीति तथा च व्यतिरेकह्रदादिमत्त्वमुपाधीनामातिव्याप्तिवारणापरं किंतु व्याप्तिरेकेव्यर्थ
विशेषणानां मूर्तत्वरूपविशेषणादानेनातिव्याप्तिवारणापरमिति वदंति तन्न वास्तवपक्षस्वारस्यादिदोषग्रस्तत्वादुपेक्षणीयमिति दिक् प्रगल्भमतं व्यतिरेकह्र
दादिमत्त्वमुक्तविशेषणादानेन नातिव्याप्तिवारणापरं किंतु वक्ष्यमाणनियमवत्त्वात् साध्यव्यापकत्वोपपादनेन तादृशवारणापरमिति वदतः प्रगल्भस्य मतं ननु व्या
प्यस्य वचनं एवं व्यापकस्य ततः परमित्यादिप्राचीनोक्तं व्याप्याया अत्र यथाप्ते प्रथममुपन्यासस्तत्तो व्यापिकायातिरकव्याप्तेरित्यस्योविरोधेन कथमत्रैव परी
क्षेनोपन्यासः स्वतन्त्र आह व्याप्यवृत्तित्वातिरेकित्वमिति लभ्यं स्यादिति तथा च तस्य व्याप्यस्य संभवात् वैयर्थ्यापत्तिरिति शेषः नचात्रैव परीक्षेनोपन्यासेऽपि यथादी

भ.प्र.
६

क्व्याप्तोः कथं व्याप्यव्यापकभावलाभ इति वाच्यं यत्र वह्निस्तत्रैव धूम इत्यादेः धूमवत्त्वादेरिवापितत्वाभसंभवात् ननु अन्वयव्याप्तेः प्रतियोगिनिरूपितयाव्यति
रेकव्याप्तेश्च तत्प्रतियोगिकाभावनिरूपितया वैयधिकरण्येन व्याप्यव्यापकभावासंभव इत्यत आह हेतुतावच्छेदकरूपेणेत्यादि अवच्छिन्नत्वार्थक तृतीयान्त
द्वयस्य प्रतियोगित्वप्रतीत्यत्र समस्यान्तप्रतियोगित्वेऽन्वयः नञ्चात्र कर्मधारयोत्तरमत्वर्थीयोपस्थापनादत्राभावेति व्याप्यवृत्त्यभावे इत्यर्थः यद्धर्मावच्छिन्नेति यद्धर्म
साध्यतावच्छेदकं तत्संबंधेति साध्यतावच्छेदकसंबंधेनेत्यर्थः तद्रूपेति हेतुतावच्छेदकरूपेणेत्यर्थः तत्संबंधेति हेतुतावच्छेदकसंबंधेनेत्यर्थः व्यासर्पः पयोर्व्यतिरेक इत्यादि
नियमार्थः अत्र साध्यादिविशिष्टप्रतियोगित्वं तस्यापि व्याप्यवृत्तिरस्ति हेतुदिविशिष्टत्वस्य मारारीसाव्याप्यवृत्तित्वमात्रस्यैव व्यावर्तकतया यथासंनिवेशे वैयर्थ्याभावा
देव प्रतियोगित्वांतनिवेश इति चरमोक्तसाध्यादिरूपेव प्रथमतस्त्वव्याप्यवृत्तिमाह संयोगीत्वादिनाव्यभिचारस्थाररणायेतिव्यतिरेके प्रतियोगिवैयधिकरण्यानिवेशादि
साशयः कालिकादिसंबंधावच्छिन्नेति प्रतियोगित्वादिसमनेनान्वितं आदिनाव्यधिकरणासंबंधपरिग्रहः व्याप्यवृत्त्यभावेति कालिकसंबंधावच्छिन्नप्रतियोगिताक
व्यतिरेकाभावस्याव्याप्यवृत्तित्वेपि तादृशावच्छेदकावच्छिन्नाभावस्य व्याप्यवृत्तित्वादिति भावः ननु इदमत्वाभाववत्त्वावच्छिन्नव्याप्यतानिरूपितव्यापकत्वस्य संयोगाभावे
सत्वात् व्यभिचार इत्यत आह संयोगाभावस्येति कालिकसंबंधावच्छिन्नप्रतियोगिताकसंयोगाभावस्याव्याप्यवृत्तित्वादाह व्यधिकरणसंबंधेनेति संयो राम०
गादिनेत्यर्थः अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः व्याप्यवृत्तित्वाच्चेति तथा च संयोगस्य व्याप्यवृत्ति अधिकरणासंबंधावच्छिन्नसंयोगाभावप्रतियोगित्वा ६

व्यभिचारइतिभावःतथैवउक्तरीत्यैवदोषःव्यभिचारःनिरुक्ताभाववत्त्वावच्छिन्नव्याप्यतानिवेशफलमाह तथापीत्यादिनेति आदिनापर्वतेतरत्वहेतोर्म
हानसत्वादिधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वस्यविषयितास्वसमानाधिकरणावह्निमत्त्वादिसंबंधावच्छिन्नपर्वतेतरत्वत्वावच्छिन्नप्रतियोगिताकाभाव
त्वस्यचपरिग्रहःतेनरूपभेदसंबंधभेदानुधावनस्योद्देश्यसिद्ध्यर्थत्वसंगतिः वन्ह्यभावव्याप्यत्वे वन्ह्यभावव्याप्यत्वज्ञाने उद्देश्यसिद्ध्यर्थंव्यतिरेकव्याप्त्य
भावेनान्वयव्याप्त्यभावसाधनसिद्ध्यर्थंतदानींव्यतिरेकव्याप्त्यभावज्ञानाभावेव्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनासंभवादितिभावः॥ तद्रूपेतितद्
र्मेतिपर्यंतःसंबंधभेदस्यचेति चकारेणरूपभेदस्यापिसमुच्चयः व्यापककोटौव्याप्यतावच्छेदकेरूपभेदसंबंधभेदानुधानस्योक्तरीत्योद्देश्यसिद्धिप्रयोजनकत्व
संभवेपिव्यापकतावच्छेदकेतदनुधावनस्यतत्प्रयोजनकत्वंनसंभवतीसतोव्यापककोटौव्याप्यतावच्छेदकव्यापकतावच्छेदकयोरुभयोरेवतदनुधाव
नस्यप्रयोजनांतरमाह अन्यथेति व्यापककोटौव्याप्यतावच्छेदकव्यापकतावच्छेदकयोःरूपभेदसंबंधाभेदाननुधावनेऽसमर्थःसंबंधादिनेतिआदिनाद्रव्यमा
त्रसमवेतत्वादिधर्मपरिग्रहःतेनरूपभेदानुधावनप्रयोजनलाभः व्याप्यत्वव्यापकत्वयोरिति यद्यप्येवमपिकालिकसंबंधावच्छिन्नप्रतियोगिताकप्रमेय
त्वाभावस्यव्यभिचाराभावोपपादकद्रव्यत्वाभावव्याप्यत्वंनसंभवत्येवतथापितादृशप्रमेयत्वाभावस्यतादृशद्रव्यत्वाभावव्याप्यत्वसंभवात्स्वसमानाधि
करणद्रव्यत्वसंबंधावच्छिन्नप्रतियोगिताकतदभावस्यद्रव्यत्वाभावव्याप्यत्वसंभवाद्युक्तंनदोषः व्याप्यवृत्तिव्यतिरेकित्वंव्याप्यवृत्तिव्यतिरेकित्वविशेषणं

म·प्र·
७

अर्थमेवस्यादिति तथा च साध्यसाधनयोर्व्याप्यवृत्तिव्यतिरेकित्वविशेषणार्थक्यार्थमेव व्यापककोटौ व्याप्यतावच्छेदके व्यापकतावच्छेदके वा खंडशाभावघट
करूपभेदसंबंधभेदानुधावनमिति भावः अत्राभावत्वेव्यापकतावच्छेदकत्वानुधावनमप्युद्देश्यसिद्ध्यर्थमेव तस्य व्यतिरेकव्याप्तिघटकतायास्सर्वसिद्धत्वात् ए
तद्व्युत्पुटतया व्याख्याता नोक्तमिति ध्येयम् अत्रोद्देश्यसिद्ध्यर्थं तद्यावच्छिन्नाभावत्वावच्छिन्नव्याप्यतस्यानुधावनं अन्यथेत्यादिनोक्तदोषवारणार्थं च सं
बंधभेदस्यानुधावनमिति यथाकथंचिद्विषय्याश्रुतार्थादरे व्यापककोटौ व्याप्यतावच्छेदके व्यापकतावच्छेदके च रूपभेदनिवेशाव्याहृतसत्वाभेन न्यूनतास्यादिति
तद्द्वारादरे रोगात्करीसास्यामिथ्यारंभो न हतमिति ध्येयमवस्तुतस्तु तद्धर्मवत्त्वादिनेत्यादिना तद्धर्मखंडभेदस्य परिग्रहः संबंधभेदानुधावनस्याकरीत्योद्देश्यसि
श द्ध्यर्थत्वासंभवेनान्यथेत्यादियंथस्तदुपपादनपरः व्याप्यवृत्तीत्यादिविशेषणाद्यटितनियमस्योद्देश्यत्वात् उपपत्तेरिति तदाशयः अन्यथैव दिशा रूपभेदाद्यनुधा
वनस्यात्र विशेषणासार्थक्यद्वारोद्देश्यसिद्ध्यर्थत्वं दूषयंति यथा श्रुतमेव सम्यक् यद्यपि व्यतिरेकव्याप्तौ रूपभेदादिनिवेशस्यावश्यकतया उद्देश्यसिद्ध्यर्थमे
वतेषां निवेशः निरुक्तव्याप्यतासंबंधभेदनिवेशयोः प्रकारांतरेणोद्देश्यसिद्धिरूपप्रयोजनांतरमप्यस्तीति तत्प्रदर्शितमिति सारं॥ विशेषणांसोध्यसाधनयो
विशेषणां ननु नवीनवीनमतेप्याकाशा[redacted]भावाभावानभ्युपगमेनाकाशाभावस्य व्यतिरेकप्रतियोगित्वाभावादेव न व्यभिचार इत्यत आह आकाशा राम०
भावस्यापीति अत एव वक्ष्यमाणादेव केवलान्वयिहेतौ केवलान्वयिनिरूपितस्यैव व्याप्यत्वस्य सत्वेन साध्यव्यतिरेकप्रतियोगित्वविशेषणादेव तत्र न व्य ७

भिचार इत्याशयेनाहतावत्त्वेनेति यथासंनिवेश इति तथा चान्वयाप्यवृत्तित्वस्य व्यतिरेकविशेषणतयैव निवेशे न हेतौ विशेषणतया निवेशो न संभवतीति भावः
अत्र च स्वसमानाधिकरणाभावप्रतियोगित्वरूपमेव व्याप्यवृत्तित्वं व्यतिरेकविशेषणं निरवच्छिन्नवृत्तिकत्वनिवेशे संयोगाभावाधारतात्वावच्छिन्नवृत्ति
कान्वनिवेशे चाकाशरूपव्यतिरेकाधारणादित्यत एवान्ता दृशेति व्यापतावच्छेदकेत्यर्थः आहुरित्यनेन दर्शितस्य लघुरूपस्यानियततैर्व्याप्यतावच्छे गुरो ३
दकत्वमते हेतौ व्यतिरेकप्रतियोगित्वविशेषणस्यानावश्यकत्वमेवास्वरसः ननु यथासंनिवेशे वैयर्थ्याभावेपि हेतौ व्यतिरेकप्रतियोगित्वविशेषणस्यप्र
योजनविरहः किं च व्याप्यवृत्तिव्यतिरेकिणोरिसमनकर्मधारयाश्रयणे व्यतिरेकपदेन रंगतथीपासंभवः नकर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रति
पत्तिकर इत्यनुशासनविरोधादतो व्याप्यवृत्तिव्यतिरेकिणोरिसमनद्वंद्वाश्रयणे न हेतौ व्याप्यवृत्तित्वमात्रस्य साध्ये च व्यतिरेकित्वमात्रस्य विशेषणत्वमुचि
तमित्याशयेनाहवस्तुतस्त्विति तथा चेत्यादि तथा च व्याप्यवृत्तित्वे सति यद्धर्मावच्छिन्नीयो व्यतिरेकितावच्छेदकयद्धर्मावच्छिन्ननिरूपितव्याप्यतावत्त्वस
तद्धर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदकतद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगीमुक्तभि
प्रमार्थ इत्याशयः ननु साध्ये व्यतिरेकित्वमात्रनिवेशे पूर्वोपदर्शितरीत्या संयोगि इ सत्त्वादित्यादौ व्यभिचारो दुर्वार इत्यत आह स्वं यत्रापि श्वेति प्रतियो
गित्वैयधिकरण्याघटितत्वेनेति अथैवं व्यतिरेकव्याप्यभावेन प्रतियोगिवैयधिकरण्याघटितात्र व्याप्यत्वाभाव एव साभाव एव साधनीयस्तथा चोपा

अ॰ प्र॰ धितावच्छेदकव्यापकतायां प्रतियोगिवैयधिकरण्यनिवेशेन पक्षेतरत्वे तद्घटितव्यापकत्वाभावसाधनासंभवात्तस्योपाधित्वं दुर्वारमिति चेन्न साध्योपाधिभेदे
८ न लक्षणाभेदात् साध्यव्यापकत्वमुपाधिलक्षणे तत्प्रवेशात् पक्षेतरत्वे प्रतियोगिवैयधिकरण्यघटितव्यापकत्वाभावसाधनानंतरं व्याप्यत्वघटितत्वसहितेन तेन तद्घटि
तव्यापकत्वाभावसाधनसंभवाच्च न चैतावता वह्नौ पर्वतेतरत्वत्वावच्छिन्नप्रतियोगिताकाभावघटितत्वसहितेन तेन तद्घटितव्यापकत्वाभावसाधनसंभवाच्च न चै
तावता वह्नौ पर्वतेतरत्वत्वावच्छिन्नप्रतियोगिताभावेन पर्वतेतरत्वत्वावच्छिन्ननिरूपितव्याप्यत्वाभावसाधनेन पक्षेतरत्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति
पर्वतसत्त्वं तच्चानुपपन्नं अर्थविशेषणात्व्यापर्वतेतरत्वत्वावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नव्याप्यताया अप्रसिद्धत्वात्तत्राह इत्थं चेति वक्ष्यमाणरीत्येत्य
र्थः वोध्यं अनुमानं वोध्यं पर्वतेतरत्वाभिमादितथा च व्यतिरेकितावच्छेदकरूपयद्धर्मावच्छिन्नो यो व्याप्यवृत्तितावच्छेदकयद्धर्मावच्छिन्नव्यापकः स तद्धर्मावच्छि
न्नाभावत्वावच्छिन्ननिरूपितव्याप्यतावच्छेदकीभूताभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्न इत्युक्तनियमार्थस्ताश्रयः व्याप्यतावच्छेदकीभूतेतत्साभावच्छेदक
व्यापकत्वमवच्छेदककोटिप्रविष्टत्वं बोध्यं एतादृशानुमाने पूर्वानुमानवदप्रसिद्धिर्नास्ति साहचर्यप्रतियोगितावच्छेदकं चेति वह्न्यभावत्वावच्छिन्ननिरूपितव्याप्यताव
च्छेदकीभूताभावत्वावच्छिन्नप्रतियोगितावच्छेदकं चेत्यर्थः प्रसिद्धमिति एवं चात्र वह्निसामग्र्यादिकं व्यतिरेकदृष्टांतः अत्र येन धूमादिकमिति बोध्यं अवच्छेदकं य राम॰
तियोगितावच्छेदकं तत्स्यादितथा च व्यतिरेकितावच्छेदकं तेसतियो धर्मो व्याप्यवृत्तितावच्छेदकयद्धर्मावच्छिन्नव्यापकतावच्छेदकः स तद्धर्मावच्छिन्नाभावत्वा ८

वच्छिन्ननिरूपितव्याप्यतावच्छेदकत्वावच्छिन्नाभावत्वकस्तुतस्त्वियमार्थ इत्याशयः न च घटत्वे कंबुग्रीवादिमत्त्वावच्छिन्नव्यापकतावच्छेदके कंबुग्रीवादिमत्त्वाव
च्छिन्नाभावाप्रसिद्ध्या साध्याप्रसिद्धिरिति वाच्यं गोत्वेन तद्वच्छिन्नभिन्ननिरूपितव्यापकतायास्तथात्वानभ्युपगमात् न च द्रव्यत्वमिथामकसंयोगादिनाकाशहेतुस्थले तद्व्या
पकतावच्छेदकद्रव्यत्वत्वे तेन संबंधेन तदभावाप्रसिद्ध्या साध्याप्रसिद्धिरिति हेतावव्यतिरेकित्वमावश्यकमिति वाच्यं तेन संबंधेन व्याप्तेरस्वीकारादिति कृतादृशेति
वह्नित्वावच्छिन्नव्यापकतानिरूपिते सर्थः वह्निसामग्रीत्वादिकमेवेति अन्वयस्य तद्व्यतिरेकदृष्टांतः अत्र च पर्वतो धूमवत्त्वादिकं दृष्टांत इति बोध्यं अत्रापि संबंधभेदविधे
शनस्य हेतुनीयं सर्वं उक्तरीत्या साध्यव्यापकतावच्छेदकत्वाभावसाधनानंतद्यक्तित्वादिनेति आदिपदात् तद्यक्तिमात्रवृत्तिस्वरूपसंबंधेन द्वयक्तिपरिग्रहः तथा तदुपाधित्वं उवीर
मितिव्यर्थविशेषणात्वस्याभावेन तद्यक्तित्वावच्छिन्नाभावत्वस्य व्याप्यतावच्छेदकत्वसंभवेनोक्तरीत्या तद्यक्तित्वे साध्यव्यापकतावच्छेदकत्वाभावसाधनासं
भवादिति भावः केचित्तु पर्वतेतरत्वादिप्रकारेणोपपक्षेतरस्य कथायामनुद्भावनात् तद्यक्तित्वादिना प्रकारांतरेणात्तस्योपाधित्वे पिक्ष्यमभावः न चैवं तद्यक्तित्वा
दीनां तस्य कथायामुद्भावनं स्यादिति वाच्यं प्रकारविशेषनिर्देशं विना तद्यक्तित्वादिनोद्भावनस्यैवाशक्यत्वादित्याहुः अत्र केचित् यां पक्षयोर्यथासंख्येनव्याप्य प्पया ३
तिव्यतिरेकित्वोरितस्याच्च पदद्वस्समंजसं अन्यथा सति व्याप्यत्वे निव्यतिरेकित्वविशेषणोनोक्तयासेः केवलान्वयिसाध्यकेऽनभ्युपगमेन तदन्यातिरेकव्याप्त्य
भावेनाव्याप्यत्वासंभवसाधनाभावेन पक्षेतरे साध्यव्यापकत्वसंभव इत्याशयमूलकस्य चमपीत्यादिना दीधितिकारेणावश्यमारास्य केवलान्व

भ॰प्र॰ ५

यिसाध्यकेपक्षेतरत्वप्रसंगस्यालग्नकतापत्तेः व्याप्यस्य केवलान्वयिनो व्याप्यवृत्तित्वेन व्यापकस्य पक्षेतरस्य व्यतिरेकित्वेनैतन्नापि उक्तव्याप्तेरभ्युपगमादित्याहुस्तन्न त
त्केवलान्वय्यभावाप्रसिद्धेर्वतमोक्तरीत्या साध्यव्यापकताभावसाधनासंभवात् किंच स्थलद्धेतावतिव्याप्तिः इदं पक्षे च आद्यस्य लाघवसाउक्तव्याप्तेरप्रयोज
कत्वं चेत्सामान्यतद्रूपतया सर्वत्रासंगतिः॥ यत्तु अत्र नवीनैरुक्तं प्रयोव्यतिरेके व्याप्तिरित्यादिनियमवादिप्रगल्भमते साध्यसामानाधिकरण्यावच्छेदकधर्मवत्त्वरूपव्या
प्तिनिरूपकतात्मकव्यापकत्वमेवोपाधितघटकतयाभिमतं न तु तद्वन्निष्ठेत्यादि व्यापकत्वं तथासति इदं पर्वतभिन्नं द्रव्यमेत्यादि अत्र पर्वतभेदे द्रव्यभेदनिरूपित
तद्वन्निष्ठेत्यादिव्यापकत्ववति अर्थविशेषणातयाव्यतिरेकव्याप्तस्य सत्वेन व्यभिचारापत्तेः अस्मन्मते तु द्रव्यरूपव्यर्थविशेषणाघटितद्रव्यभेदत्वस्य पर्वतभेदरूपसा
ध्यसामानाधिकरण्यनिरूपितस्वरूपसंबंधरूपावच्छेदकत्वाभावेनोपादर्शितव्यापकत्वस्य पर्वतभेदे असत्वादेव न व्यभिचार इति तदपि न सम्यक् सर्वत्र प्रथमकल्पा
भै स्वरसेवोद्वितीयकल्पस्योत्थानेन द्वितीयकल्पानुसारेणोपतद्ग्रिमग्रंथयोजनस्य सांप्रदायिकतयोक्तनियमस्य तद्वन्निष्ठेत्यादिव्यापकत्वाभिप्रायकत्वस्यैवोचित्या
त्तेनचोक्तव्यभिचारेणान्त्याभिप्रायकत्वं न संभवतीत्यगत्या प्रथमकल्पाभिप्रायकत्वं मंगीक्रियत इति वाच्यं तत्र यद्रूपमात्रारीत्या पर्वतव्यापकद्रव्यभेदेनैव पर्वतभेदानु
मानसंभवे पर्वतभेदे द्रव्यभेदव्यापकतानभ्युपगमसंभवेन व्यभिचाराघात् पर्वतो द्रव्यभिन्नः सत्वादित्यादौत साध्याधोन्नीतपक्षेतरत्वेन न तत्र मणिकृता वायेवाधोन्न राम॰
तसाधीत्यादिसमाधानग्रंथेन व्यभिचारदानाद्व्यतिरेकइत्यादिग्रंथस्य दर्शितनियमपरत्ववादिमते त द्रव्यस्यबाधोन्नीतस्यानुपाधितापत्ता व्यतिरेकव्या ५

सभावेऽप्यन्वयव्याप्तिसत्त्वप्रदर्शनपरतयाऽव्यभिचारप्र[illegible]दर्शनपरत्वात्तत्तद्धर्मस्य व्यतिरेकव्याप्त्यभावेनान्वयव्याप्त्यभावसाधनेनानुपाधिता पत्तमभिप्राय
कत्वे च व्यभिचारप्रसक्तिरेव नास्ति तदेतत्सर्वमभिप्रेत्याह दितिगि ननु धूमाभाववान्ह्नदाभावादित्यादावेव व्यभिचारसंभवेन शरीराहेतुकमहेतुकता हेतावस
र्वतानुसरणमफलमित्यत आह धूमाभाववानिति आप्तिविरहेऽपि धूमादिविशेषणायैव यर्थ्येन व्यतिरेकव्याप्तिविरहेऽपि न क्षतिः न व्यभिचारः धूमाभाववत्त्वावच्छि
न्नेति धूमाभाववत्त्वावच्छिन्ननिरूपितेत्यर्थः व्याप्तेः व्याप्यीभूतान्वयव्याप्तेः अनभ्युपगमस्यापीति उक्तनियमानुरोधेनेत्यादिनोदाहृतव्यभिचारप्रदर्शनस्य
लत्वेन नोदाहृतन्यायेऽनभ्युपगमस्थलेऽपि शरीरहेतुकस्य व्यापकस्य हेतुकताभावेनैव नैव शरीरहेतुकत्वाभावानुमानसंभवेऽहेतुकत्वे शरीराहेतुकत्वव्याप्तेरनभ्यु
पगमसंभवान्न व्यभिचार इति भावः तत्र शरीरविशेषणतावैयर्थ्येनोक्तरीत्या शरीरहेतुकत्वाभावानुमानासंभवेन तदनुमाननिर्वाहार्थमहेतुकत्वे शरीराहे
तुकत्वान्वयव्याप्तेरभ्युपगमस्यावश्यकत्वात् अथ धूमाभाववान्वन्ह्यभावादित्यादौ धूमाभावनिरूपितवन्ह्यभावादिनिष्ठव्याप्तेरनभ्युपगमे उक्तनियम
मे व्यभिचारभिया धूमादौ वन्ह्यादिव्याप्तेरभ्युपगमस्याप्यसंभवेन कथं धूमादिव्यापकवन्ह्यभावादिना धूमाभावाद्यनुमानसंभव इति चेन्न उक्तनियमे
व्यतिरेकनिष्ठव्याप्तेरन्वयव्याप्तित्वेन निवेशेऽनवस्थापरीहाराय व्यतिरेकनिष्ठव्याप्तेरेव निवेशेन वन्ह्यभावादौ धूमाभावादिनिरूपितायाऽन्वयव्याप्ते
रनभ्युपगमेऽपि तद्विलक्षणाया धूमव्यापकवन्हिप्रतियोगित्वादिरूपव्याप्तेरभ्युपगमे बाधकाभावेन तामादायैव व्यभिचाराभावोपपादनेन धूमादिना

भ.प्र. १०

वन्ह्याद्यनुमाननिर्वाहकधूमादौ वन्ह्यादिव्याप्यत्वाभ्युपगमस्यासंभवात् नचयुक्तरीत्या साध्ये पक्षेतरत्वानुमानस्यानुपगमात् सते नउक्तनियमस्वीकारे यत्राईंध
नाद्यभाववत्त्वं तत्र धूमाद्यभाव इति व्याप्तिर्न संभवति अर्थविशेषणात् यत्र यत्र धूमाद्यभावाभावस्तत्राईंधनाद्यभाव [redacted] इति व्यतिरेके व्याप्त्यसंभवात् तत
द्याच यत्र धूमसत्त्वात्राईंधनमिति वा व्याप्तिप्रसिद्धिः तत्तद्व्यतिरेकयोर्व्याप्ति [redacted] विरहादिति उपाधिमात्रोच्छेद इति उक्तनियमेन वीनानां इष्टगोष्ठावनपरास्तधूमा
द्यवाईंधनादेरपि व्याप्तेरभ्युपगमे न तद्धि तैरायात्राईंधनाभावादौ धूमाभावादिनिरूपितव्याप्तेरभ्युपगमेन चोक्तदोषाभावात् अत एव पयोर्व्यतिरेकद्वया
दिनियमोऽसंभव उक्ति करवत्र अप्रसिद्धिवारकधूमादिविशेषणाघटितधूमाद्यभावत्वेन व्याप्यभावेन वन्ह्याद्यभावेपि धूमाद्यभावव्याप्तेरसंभवाद्धूमादावपि न व
न्ह्यादिव्याप्तिरिति साध्यसाधनयोरप्रसिद्धेरिति मान्योक्तिरपि निरस्ता केचित्तु व्याप्यतावच्छेदकत्वावच्छिन्नाभाववत्त्वकं पक्षत्वं तत्त्वाभाववान्यः व्याप्यवृत्तिव्यतिरेक
प्रतियोगितावच्छेदकः सः व्यापकतावच्छेदकत्वस्याभाववानित्युक्तनियमतात्पर्यार्थः तथा च पक्षविशेषणवैयर्थ्येन पक्षेतरभेदत्वस्य आप्यतानवच्छेदकतया
तादृशस्यत्वाभावेनोक्तव्यापकतानवच्छेदकत्वसाधनं सर्वसाध्यकस्थल एव निराबाधं एवं च न पूर्वापरोक्तदोषलेशोपीत्याहुरिति मात्सर्यमपहाय विहितैरालो
चनीयमिति संक्षेपः पर्वतत्वसमनियतस्यापीति प्रतियोगितावच्छेदकभेदेनैवाभावभेद इत्यादिनवीनमते इत्यादि प्रतियोगिभेदेन तादृशप्रतियोगित्वात्मक
प्रतियोगिभेदेन सप्तमेतिता तादृशप्रतियोगित्वाभावस्य नानात्वेन पर्वतत्वासमनैयत्यात् तद्रूपत्वासंभवेनातिरिक्तत्वासंभवेनातिरिक्तत्वादिति भावः यद्यपि पर्वत

राम० १०

त्वसमनियतस्यापीति यथाप्रकृते स्वप्रतियोगिभेदेनप्रतियोगिवैलक्षण्येनभावप्रतियोगिकत्वेनेतियावत्स्वसमभेति प्राचीनैर्भावप्रतियोगिकाभावस्यातिरि
क्तस्वीकारेणातादृशप्रतियोगित्वाभावस्यपर्यवसितत्वरूपत्वासंभवादितिभावः मतांतरमाह स्वविशेषणेत्यादि अत्रस्वविशेषणघटितविशेष्यतावच्छे
दकावच्छिन्नाधिकरणवृत्तिस्वविशिष्टेत्यादिपाठः अत्रप्रथमस्वपदमहेतुकत्वादिरूपविशेष्यतावच्छेदकपरं द्वितीयस्वपदंशरीरादिरू
पविशेषणपरं तद्विशेष्येत्यस्यस्वविशेष्येत्यर्थः विरोधांविशेष्यतावच्छेदकावच्छिन्नं तथाचयद्विशेष्यतावच्छेदकेयद्विशेषणांतद्विशिष्टतद्विशेष्य
तावच्छेदकावच्छिन्नाधिकरणवृत्तिर्यत्तद्विशेषणविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभाववत्त्वं पत्तद्विशेषणांतदवच्छिन्नतद्विशेष्यतावच्छेद
कावच्छिन्नाभाववत्वभिन्नत्वं साध्यतावच्छेदके निवेशनीयमितिसमुदायार्थः एवंचाहेतुकत्वत्वेयद्विशेषणंशरीरंतद्विशिष्टाहेतुकत्ववत्त्वविशिष्टाधि
करणक्षितिसंकुराद्यवृत्तिर्यः शरीराहेतुकत्वाभाववत्त्वं विशेषणंशरीरंतदवच्छिन्नतद्विशेष्यतावच्छेदकहेतुकत्वत्वावच्छिन्नाभाववत्त्वंशरीराहेतु
कत्वत्वपर्यवसितंतद्भिन्नत्वस्यसाध्यतावच्छेदकेऽसत्वात्तद्युत्सङ्गत्वाशयः वस्तुतस्तुतत्रप्रथमस्वपदमभाववत्त्वादिरूपविशेष्यतावच्छेद
कावच्छिन्नपरं विशेष्यतावच्छेदकपरत्वाद्द्वितीयस्वपदंशरीरत्वरूपविशेषणपरंतद्विशेष्यतावच्छेदकावच्छिन्नेत्यस्यस्वविशेषणघटितवि
शेष्यतावच्छेदकावच्छिन्नेत्यर्थः तत्त्वविशेष्याभावेत्यत्र तत्सविशेष्यमितिविग्रहः तत्सदं विशेषणपरं तद्विशेष्येत्यस्य तद्विशेष्यतावच्छेदकाव

भ॰प्र॰ ११ च्छिन्नेसर्थःतथाचयद्विशेष्यतावच्छेदकावच्छिन्नेयद्विशेष्यतावच्छेदकेवायद्विशेषणांतद्व्यक्तिद्विशेष्यतावच्छेदकावच्छिन्नाधिकरणावृत्तिंस्वविशिष्टत
द्विशेष्यतावच्छेदकावच्छिन्नाभावोयस्यतादृशेयद्विशेषणांतरवच्छिन्नतद्विशेष्यतावच्छेदकावच्छिन्नाभाववत्वभिन्नत्वंसाध्यतावच्छेदकेनिवेशनीय
मितिसमुदायार्थःघटितत्वंचविशिष्टत्वं एवंचाभाववत्वरूपविशेष्यतावच्छेदकावच्छिन्नेतादृशविशेष्यतावच्छेदकेवायद्विशेषणांहेतुकत्वरूपंतद्वि
शिष्टतद्विशेष्यतावच्छेदकावच्छिन्नंमहेतुकत्वंतदधिकरणगगनाद्यवृत्तित्वस्यशरीरहेतुकत्वावच्छिन्नाभावेसत्वेनशरीररूपविशेषणांतादृशतद
वच्छिन्नतद्विशेष्यतावच्छेदकावच्छिन्नाभाववत्वंशरीरहेतुकत्वावच्छिन्नाभाववत्वंतद्भेदस्यशरीरहेतुकत्वत्वरूपसाध्यतावच्छेदके:सत्वात्तघुदासःशरी
राभावाभावस्यविशेष्यतावच्छेदकाभाववत्वावच्छिन्नाभावाधिकरणावृत्तित्वेनशरीरहेतुकत्वाभावस्यविशेष्यतावच्छेदकहेतुकत्वत्वावच्छिन्नहेतुकत्व
सहेतुकत्वोभयाद्यभावस्याहेतुकत्वाधिकरणावृत्तितयायेस्वविशिष्टतद्विशेष्यतावच्छेदकावच्छिन्नाभावनिवेशस्यावश्यकतया एवंविशेष्यतावच्छेदकानि
वेशेप्रेतथानिवेशासंभवइतिविशेष्याधिकरणात्वंविहायविशेष्यतावच्छेदकावच्छिन्नाधिकरणात्वनिवेशःविशेषणतादृशाभावयोरभावकमितिक
प्रसयाव्याप्यसंबंधस्यैरणापस्वविशिष्टेतिउभयाभावादिसाधारणशरीरहेतुकत्वाभाववत्वभेदस्यशरीरहेतुकत्वत्वावच्छिन्नाभाववत्वात्मकसाध्यतावच्छे राम॰
दकेसत्वाततत्तद्विशेष्यतावच्छेदकावच्छिन्नाभाववत्वभेदानिवेशःहेतुकत्वाभाववत्वभेदस्यशरीरहेतुकत्वत्वेसत्वात्तदवच्छिन्नेतिध्येयं स्वविशेषणताघटित ११

विशेष्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वादिपाठः। स च प्रामादिकः। स्वविशेषणाघटितत्वस्य वैयर्थ्यात्। अत एव स्वविशेषणाघटितविशेष्यतावच्छेदकावच्छि-
न्नाधिकरणावृत्तित्वादिपाठो ऽप्ययुक्तः। शरीरत्वाभावाभावस्याभावाधिकरणावृत्तित्वाच्च। यत्तु स्वविशेषणाघटितविशेष्यतावच्छेदकावच्छिन्नाधिकरणावृत्तित्वादिपा-
ठः समीचीनः। विशेष्यतावच्छेदकं चान्वयव्यतिरेकव्याप्तेर्ग्राह्यं तथा च यत्र शरीराहेतुकत्वाभावसमानाहेतुकत्वाभावः तत्र व्यतिरेकव्याप्तेर्यद्विशेष्यतावच्छेदकं शरीरा-
हेतुकत्वाभाववत्त्वं तत् शरीररूपं यत्स्वविशेषणं तदघटितं अहेतुकत्वाभाववत्त्वमिति भावः। एतदवच्छिन्नाधिकरणा क्षित्यंकुरादिवृत्तिर्यं। शरीररूपं विशेषणा-
विशिष्टं पत्व्यतिरेकव्याप्तेर्विशेष्यतावच्छेदकं शरीराहेतुकत्वाभाववत्त्वं तदवच्छिन्नाभावः शरीराहेतुकत्वरूपः। एतस्मात् दर्शयन्नाह विशेषणांशशरीररूपं तदवच्छिन्नं यत्-
तद्विशेष्यं व्यतिरेकव्याप्तेर्विशिष्टं शरीराहेतुकत्वाभाववत्त्वस्याभाववत्त्वरूपत्वं शरीराहेतुकत्वत्वस्येति तद्भिन्नत्वं न शरीराहेतुकत्वत्वरूपसाध्यतावच्छेदकस्येति तद्-
हासशरीराहेतुकत्वाभाववत्त्वावच्छिन्नाभावः शरीराहेतुकत्वरूपो न शरीराहेतुकत्वाभावाधिकरणावृत्तिरतः स्वविशेषणाघटितेनेति तेन अहेतुकत्वाभाववत्त्वलाभ इति
तन्मात्रव्यतिरेकव्याप्तेर्यद्विशेष्यतावच्छेदकमिति समकृतो लाभ इति प्रश्ने ऽन्तराभावात् किंच व्यतिरेकव्याप्तिविशेष्याधिकरणावृत्तीत्याद्युक्ते एव स्फुटाहेतुकत्वाभावस्य
विशेष्यतया लाभसंभवेन विशेष्यतावच्छेदकावच्छिन्नेति प्रक्षिप्तं स्वविशेषणाघटितेत्यस्य आवृत्ते: प्रक्षालनादीति न्यायप्रसक्तत्वाच्च केचित्तु स्वविशेषणाघटितवि-
शेष्यतावच्छेदकावच्छिन्नाधिकरणावृत्तीत्यादिना अघटितः पाठः स्वपदं यद्रूपं शरीररूपविशेषणापरं परंपरया तत्संबंधपदार्थविशेषणापरं तथा च शरीराहेतुक-

अ॰ मु॰ त्त्वावच्छिन्नाधिकरणोद्देश्यतिस्य शरीरहेतुकत्वाभावे सत्त्वेन शरीररूपविशेषणास्यतादृशतयात एवावच्छिन्नतद्विशेष्याभाववत्त्वभेदस्य शरीराहेतुकत्वत्वेऽस
१२ त्त्वान्न द्युदासइत्याद्युः विशेषणाप्रवेशे गौरवादाह अत्र यथाश्रुतेरिति अस्वरसइत्याद्युरिति पाठः अस्वरसइत्यस्य एवमपीसत्त्वास्वरसइत्यर्थः ध्वनित इत्यतन्त्रा
हेत्यप्याहुरिपाठः तत्रइत्यतआहेतस्य एवमपीतीतिशेषः आहुरित्यस्वरसोद्भावनं तद्वीजं च तत्रान्वयव्यतिरेकाभ्युपगमेऽङ्गीकारी साध्यविशेषणतानयात त्रव्यतिरेक
व्याप्तेरप्यभावेन तदनुमानानिर्वाह इति व्याप्यवृत्तीतिद्वंद्वचकर्मधारयपक्षाभिप्रायेणाद्वंद्वपक्षेपियथाकेवलान्वयिनी साद्ध्यंथस्यनासंगतिस्तथापूर्वमेवोक्त
दीधितौ वाधोन्नीतत्वादिति वाधेन पक्षे साध्याभावनिश्चये नोन्नीतः साध्यव्यापकत्वेन प्रमापितत्वादित्यर्थः साध्यव्यापकत्वादिति यावत् तेनानुसाध्यव्यापकत्वे
ऽप्युपाधिरेवेत्यसंगतं व्यभिचारोन्नायकत्वेन दूषकतामते साधनव्यापकस्य साध्यव्यापकत्वेप्युपाधित्वाभावादत आह व्याख्यायां यत्रेति तत्रेत्यंतं पूर्व
राङ्केशभयादाह सत्यंतिपक्षेति साधनव्यापकोप्युपाधिरेवेति भावः एतत्पक्षे वाधोन्नीतत्वादित्यस्य वाधउन्नीतो येन तत्त्वादित्यर्थः सम्यक् अनुपाधित्वेऽप
धित्वस्यैवाभावात् अनुपाधित्वे उपाधिमात्रमितिमूलमसंगतमत आह मूले इति वस्तुगत्या पक्षाहेतेरपि पक्षवृत्तित्वभ्रमदशायामुपाधित्वनिश्चयसंभवेनो
च्छेदासंभवादाह विशेषदर्शिनामिपरामेतत्उच्छेदपदार्थस्यान्यस्य संबद्धत्वेनिर्वक्तुमशक्यत्वादाह साध्याव्यापकत्वनिश्चयइति पूर्वगांदिनैवाहपक्षादृत्तेरि राम॰
समवेति इन्द्रे तु विशिष्टांतेतरत्वांतयोः कर्मधारयः यत्किंचिदित्यादि अत्र पर्वतो वह्निमान् धूमादित्यादौ पर्वतावृत्तित्वादिविशिष्टवन्ह्यादेरुपाधितापत्तिव १२

ह्नित्वादेः पर्वतावृत्तित्वादिविशेष्यतावच्छेदकतया पर्वतावृत्तित्वादिविशिष्टवह्नित्वाद्यवच्छिन्नाभावस्य ह्रदादिविपक्षे सत्त्वेन पर्वतावृत्तित्वादेर्विपक्षव्या
वर्त्तकत्वादतोऽवच्छेदकांतं विशेष्यतावच्छेदकविशेषणं आर्द्रत्वादिविशेष्यतावच्छेदकेंधनत्वादेर्विपक्षसामान्यवृत्तितानवच्छेदकत्वेनार्द्रत्वादेरसंग्रहाप
त्तिरतो यत्किंचिदिति विपक्षविशेषणं घटत्वादेरपि घटाद्यधिकरणाद्ह्रदादियत्किंचिद्विपक्षवृत्तितावच्छेदकरूपा पर्वतीयघटत्वाद्यवच्छिन्नाभावस्य
तद्विपक्षे सत्त्वेन पर्वतत्वत्वादिघटकपर्वतादेरपि विपक्षव्यावर्त्तकतापत्तिरतोऽवच्छेदकांतविशेष्यतया स्वविशेष्यतावच्छेदकनिवेशः सामान्यतो विशे
ष्यतावच्छेदकत्वस्याव्यावर्त्तकतया स्वविशेष्यतावच्छेदकमिति स्वं प्रकृतविशेषणं तथा च प्रकृतविशेषणतानिरूपितविशेष्यतावच्छेदकमित्यर्थः
तेन पर्वतीयघटत्वादिघटकघटत्वादेः पर्वतविशेष्यतावच्छेदकत्वेपि न क्षतिः इंधनत्वाद्यवच्छिन्नाभावस्यायोगोलकादावसत्त्वात्स्वविशिष्टेति गुणाक
र्मान्यत्वोपलक्षितसत्ताभावस्य गुणादावसत्त्वेन गुणकर्मान्यत्वस्य विपक्षव्यावर्त्तकतासंभवेन द्रव्यं सत्त्वादित्यत्र गुणकर्मान्यत्वविशिष्टसत्त्वस्यानुपाधि
तापत्तिरतो वैशिष्ट्यनिवेशः स्वविशिष्टाभावमात्रोक्तौ यत्किंचिद्विपक्षवृत्तितावच्छेदकस्वविशेष्यतावच्छेदककस्वविशिष्टाभावपर्यवसाने आर्द्रत्वादेरप्य
संग्रहः तद्विशिष्टयोरयोगोलकादौ सत्त्वात् अतः स्वविशिष्टतदवच्छिन्नाभावेति यथाकथंचित्सर्वतंतरत्वाभावस्य ह्रदादिविपक्षे सत्त्वेन पर्वतादेर्विपक्ष
व्यावर्त्तकतापत्तिरतस्तदाश्रयाभावेति विहाय तदवच्छिन्नाभावेत्युक्तं आर्द्रेंधनाभावस्य ह्रदादिविपक्षेऽसत्त्वात्तद्विपक्षकेति तद्वदिति विपक्षव्यावर्त्तकत्वव

भ०प्र० दित्यर्थः इदंचार्द्रत्वमित्यनेनान्वितं तदवच्छिन्नस्वविशिष्टाभावेतियद्यपि पूर्वमेतद्विपरीतमुक्तंतथापिविशेष्यविशेषणाभावेविनिगमनाविरहेणोभयमु
१२ क्तावपिनक्षतिरित्याशयः तादृशेति अमत्वांतंपर्वतादेरित्यन्वितं पर्वतामत्वादाविति समस्यार्थोघटकत्वं एवमग्रेपियथाश्रुतविशेषणत्वस्यगुणात्वेस
त्वाद्दाहृयत्किंचिदिति अतएवेत्यादिवक्ष्यमाणास्वरसाद्दाहवस्तुतस्त्विति आर्द्रत्वादेरुक्तहदादिरूपविपक्षभेदव्याप्यतावच्छेदकत्वोचेनप्रवेशइतिप
किंचिदिति कोद्यमविषत्वमिति अत्रप्रविष्टत्वंनियमतः तद्विषयकप्रतीतिविषयत्वं तद्विषयताव्यापकविषयताप्रतियोगित्वं पर्यवसितं तच्चाभे
देपिसंभवतीतिदूषयंसत्त्वादित्यत्रगुणत्वादेर्विपक्षव्यावर्त्तकत्वनिर्वाहः विशेषणत्वंचयथाश्रुतमेवाखंडाभावघटकं सर्वमेवआर्द्रत्वेधनत्वादिरू
पमित्यर्थः व्याप्यतावच्छेदकंतत्कोटिप्रविष्टं एवमग्रेपि इष्टापत्तिघटकसंबंधेनेति अन्यथावह्नित्वादेरपि कालिकादिसंबंधेनह्रदादिरूपविपक्षवृत्ति
तावच्छेदकतयोक्तरीत्यापर्वतावृत्तित्वविशिष्टवह्न्यादेरुपाधितावारणासंभवादितिभावः उपाधौ इत्यरूपोपाधौविशेषणपदस्ययत्किंचिद्भिन्नेत्या
दिनिरुक्तविशेषणतातात्पर्यकत्वेऽप्यभावादाहइत्यादीति आदिनाविशेषणतापदस्ययत्किंचिद्भिन्नावच्छेदकावच्छिन्नविशेषणत्वार्थकत्वकल्पनागौरव
रूपदूषणापरिग्रहः विवक्षितोनैवेति अनवच्छिन्नांतस्यसाध्यव्यापकत्वसाधनाव्यापकत्वयोरुभयोरेवान्वयेपि पूर्वोपदर्शितरीत्याएतद्विवक्षणस्याव राम०
श्यकत्वादितिभावः तद्विवक्षितमितिकर्मधारयेऽन्वयापत्तेराहतस्येति विवक्षितमिति नहीत्यादि व्याघातइत्यंतमूलोक्तदोषपरिहाराय इत्यादि पक्षेतरत्व १२

स्यसाध्यव्यापकत्वरूपदूषकताप्रयोजकरूपवत्त्वं वा सत्त्वं नास्तीत्यत आह तत्त्वेनेति दूषकताप्रयोजकरूपवत्त्वेनेत्यर्थः नन्वुपाधेर्निश्चितदोषत्वात्तत्त्वेन ज्ञानस्य
च सर्वदाऽसंभवेन पक्षेतरत्वस्यानुपाधित्वाभ्युपगम एव युक्त इत्यत आह दृढं चेति ऽनुपाधित्वानभ्युपगमस्यायुक्तत्वकथनं चेत्यर्थः मूले च साध्यव्याप
कत्वसाधनाव्यापकत्वे तत्र सत्त्व इत्यादिमूले च दीधितौ वारणाय चेति चकारो विशेषणतोपादानमित्यनंतरं योजनीयः व्याख्यायां यत्सत्प्रतिपक्षोन्नायकत्वस
सत्प्रतिपक्षोन्नायकत्वस्यापि उपक्रमात् पक्षेतरव्यावृत्त्या साध्यव्यावृत्तिरित्यनेनोपक्रमात्तावन्मात्रस्येत्यादिपदं हेतोर्व्यभिचार एवेत्यनेनोपक्रांत
व्यभिचारोन्नायकत्वोपयुक्तरूपं च प्रक्रांतसाध्यव्यापकत्वसाधनाव्यापकत्वोभयपरामर्शकमपि तावन्मात्रस्येत्यनुपूर्वीकृता तावन्मात्रस्यैव दूषकताबीजे ति
वाक्यस्य प्रथमपदं दूषकतादीति द्वितीयपदस्य स्वत एवोभयसाधारणेन सत्प्रतिपक्षोन्नायकत्वसाधारणाया व्याख्येयत्वादिति भावः वाच्ये स
त्प्रतिपक्षोन्नायकत्वोपयुक्तसाध्यव्यापकत्वपरतया व्याचष्टे साध्यव्यतिरेकोन्नयनक्षमेतीति क्षमांतेन साध्यव्यापकताविशेषणे न साधनाव्याप
कत्वस्यात्रानुपयोगित्वं व्याख्याबीजं स्वयमेव स्फुटीकृतं न चैतदर्थं सत्प्रतिपक्षोन्नायकत्वमेव तद्विशेषणत्वेन वक्तुमुचितमिति वाच्यं क्षमांतस्य तद्विवरण
विना तदर्थस्फुटीकरणेन फलतस्तस्यैवोक्तत्वात्तथा च तावन्मात्रस्येति मूलं सत्प्रतिपक्षोन्नायकत्वव्यभिचारोन्नायकत्वोभयाभिप्रायकं तत्र सत्प्रतिपक्षोन्नाय
कत्वाभिप्रायकत्वे तावन्मात्रस्य साध्यव्यापकतामात्रपरामर्शकत्वं व्यभिचारोन्नायकत्वाभिप्रायकत्वे तु साध्यव्यापकत्वसाधनाव्यापकत्वोभयपरामर्शक

मा० प० त्वंमात्रपदेन च विपक्षेत्यादिविशेषणस्यैव व्यवच्छेदः एतेन तावन्मात्रस्येति मूलं सत्प्रतिपक्षोन्नायकत्वमात्राभिप्रायकं तदनुसारेणैव दीधितिकारेणा
१४ पि तावन्मात्रं साध्यव्यापकतामात्रपरतया व्याख्यातं मात्रपदेन च साध्यव्यापकत्वाभिमतसकलविषयव्यवच्छेद इत्यपि निरस्तं व्यभिचारोन्नायकत्वो
पक्रमविरोधात् मात्रपदेन चेत्साध्यव्यसंगतं साधनाव्यापकत्वप्रक्रमविरोधात् पक्षान्तरे तस्यापि सत्प्रतिपक्षोन्नायकत्वोपयोगितया तद्व्यवच्छेदस्य
मदन्मते च असंभवाच्च दीधितिकारस्य व्याख्यानमपि सत्प्रतिपक्षोन्नयनपक्षाभिप्रायकं न तु तन्मात्राभिप्रायकं एतन्मूलमनायैवात्रैव दीधितिकारेणा
दूषकतादिमस्य सत्प्रतिपक्षोन्नयनोपयोगित्वादिति व्याख्यानं परित्यज्य दोषोन्नयनोपयोगित्वाद्विशेषणमित्यभिप्रायसाधारण्येन व्याख्यानं कृतमिति
मनसि निधायाह तथा चेति उपाधेः दोषोन्नायकं पक्षेतरादि साध्यव्यापकाभावस्य सत्प्रतिपक्षस्योन्नायकत्वात् साध्यव्यापकव्यभिचारस्य व्यभिचार
स्योन्नायकत्वादिति योजना साध्यव्यापकाभावस्येति साध्यव्यापकव्यभिचारस्येति च सावधारणं वर्त्तमानत्वार्थकेन मतस्येन वर्त्तमानोपयोगित्वा
भावव्यवधानेन उक्तव्यापकत्वपर्यवसितमुन्नयनोपयोगित्वमविनसाध्यव्यापकत्वमात्रेऽस्तु तत्राह उन्नयनोपयुक्तत्वादिसर्थ इति तथा च यथाकथं
चिदुपयोगस्याविवक्षितत्वे याऽदृततत्कविधया साध्यव्यापकत्वेन तत्सत्वमयाहतमिति भावः एवं च तेन मूलार्थ इत्यनेनान्वयः अतएवेति मूलार्थः अतए
वे[illegible]मिति मूलार्थः अत एवेतस्य च व्यभिचारोन्नायकत्वादेवेत्यर्थः उक्तरीत्यानुमानमात्रोच्छेदेन व्यभिचारानुमानमहत्तरसंभवेन पक्षेतरत्वदूषकः रस म राम०
१४

र्थत्वमेवासिद्धमत आह। अनुमानप्रवृत्तिस्त्विति व्यभिचारानुमानप्रवृत्तिस्त्विसमर्थः। तद्ज्ञानदशायामेव पक्षेतरांतरस्योपाधित्वाज्ञानदशायामेव पूर्वपक्षिरा
द्युपाधित्वानंगीकारेप्यसंभवीमत आह तवेत्ति तवेत्यस्यासिद्धंतिनइत्यर्थः। नसदुपाधिरित्यनेन पक्षेतरएवतत्रोपाधिरिति प्रथमपक्षे षोद्धारेपि व्यर्थविशे
षणाभितिद्वितीयदोषोनुद्धृत एवेत्यत आह तथाचेति न्यूनताभंगायेति न्यूनताभंगाय चेत्यर्थः। सत्प्रतिपक्षोन्नायकत्वमात्रेणा दूषकतापरिशेषाय व्यभि
चारोन्नायकत्वस्येवव्याप्यभावोन्नायकत्वस्यापिप्रतिक्षेप्यतयातदप्रतिक्षेपे न्यूनतास्यादितिभावः। एतपतिआदिपदं एतयत्तिद्गमवस्येव व्यभिचारोन्ना
यकता [redacted] भावव्याप्यत्वाभावोन्नायकत्वाभावोभयस्येव यद्यपि अव्यभिचरितसामानाधिकरण्यरूपविशिष्टव्याप्यभाववोधका
व्याप्यत्वपदयोर्विशेषणाव्यभिचाराभावरूपव्यभिचारपरत्वेनैवसामंजस्ये आदिपदत्रयप्रणामनुचितं तथापिव्याप्यभावोन्नयनेपिव्यतिरेकेऽसाधा
रणाभावेन पक्षेतरत्वेव्याप्यभावोन्नायकत्वेन दूषकत्वसंभवे नलक्ष्यतयातद्दूरकव पक्षेत्यादिविशेषणादनस्यासंगत्या पस्यासत्प्रतिपक्षोन्नायकत्वमा
त्रेणा दूषकतापरिशेषाय तथाप्रणामेवोचितमितिभावः। प्रतिपक्ष्यवहुत्वेति विरोधिपरामर्शविषयहेतुनिष्ठवहुत्वेत्यर्थः। वलसंपन्नयेइतिसत्प्रतिप
क्षस्थलेवलवद्धेतुविषयकविरोधिपरामर्श [redacted] स्येवानुमितिप्रतिवंधकतयानिरुक्तवलस्यानुमितिप्रतिवंधकतोपयुक्तत्वादितिभा
वः। दीधितौ अवलत्वादिति अनुमितिप्रतिवंधकतोपयुक्तवलत्वाभावादित्यर्थः। उक्तं अस्माकं सम्मतं चोवरुद्धव्याहेतवइत्यग्रंथेनोपपादकतोक्तंव्याख्यायान

बहुलत्वं बलमिति किंतु व्याप्तिपक्षधर्मतारूपमेवेति शेषः दीधितौ एकत्रेत्यमतस्य अंगभंगप्रसक्तो साध्यतदभाववहेत्वो रन्यतरत्वेऽप्यन्यतरव्याप्तिपक्ष
धर्मतामतराभाववत एकाधिकरणाहितत्वे भ्रमपव्याप्यकत्वादिमनुमानेन सामान्यतो व्याप्तिपक्षधर्मताभंगसाधने व्याख्यायां तर्कोव्यापकतया
विशिष्य एकत्र हेतौ व्याप्तिपक्षधर्मताभंगरूपविशेषपर्यवसानसंपादकनिरुक्ततर्कसंपादकतया वक्तृत्वं प्रतिपक्षवद्बहुत्वं नन्वेवं तादृशतर्को
त्थापनार्थमेव सत्प्रतिपक्षे सत्प्रतिपक्षांतरस्योपाधेश्चोद्भावनमावश्यकं अन्यथा तदनुद्भावने प्रतिपक्षवद्बहुत्वस्यासंभवेन निरुक्ततर्कोत्थानौ
संभवादिसत आह तथाचेति तर्कोत्थापकं तर्कसंपादककारणांतरं न वृत्तं न संपन्नं वर्थमेवेति तत्र तर्कोत्थानस्यैवाभावेन तर्को [redacted]
त्थापनार्थता संभवादिति भावः दीधितौ न च सत्प्रतिपक्षे व्याख्यायां किंचैवं द्विमिसस्येति मध्ये सत्प्रतिपक्षांतरवदित्यस्य व्याख्यानेन एवं हीत्यस्य ए
वमिति व्याख्याने संदर्भविरोधापत्तेरिति भावः इत्यादिनेति अन्यथा बाधस्याविनिश्चयइत्यादि [redacted] र्नन्वितीत्यंतको ग्रंथ इति ध्येयं केचित्तु नन्वाधनि
श्चयकाल एव नासाधारणं सपक्षे व्यावृत्तत्वाभावादिति व्यतिरेकइत्यादिमूलमसंगतमतो बाधानिश्चयकालाभिप्रायकतया तत्संगमपितुं प्र
रयति बाधयइति बाधनिश्चयकालेप्युपाधित्वानुपपत्तिसंगमयितुं प्रेरयति निश्चयइत्यादि बाधस्येत्यनुपपत्तेया धोन्नीतपक्षेतरानु राम०
पाधित्वे इष्टापत्तितासर्वकत्वं न त्विसादिमूलस्याहमाभूदिति एवं च बाधस्यानिश्चयइत्यादेवैयर्थ्यादिमत एकोयंथः मामूदित्यादर्भि १५

नएवंक्वचिन्नतु मा भूद्धिंसादिपाठो पीसाकुः इत्यादिनेसमनंतरं नन्वेवं यथोक्तेपीसादिरवपाठेनुपाधिः पक्षेतरोपाधिः नास्तीति तथा च तादृशव्याप्यस
त्वेबाधोन्नीतपक्षेतरस्यानुपाधित्वेइष्टापत्तिरेवेतिनतरापत्तिसंभवइतिभावः बाधेबाधस्वरूपहेत्वाभासविभाजकोपाधिमतिइत्येवेति एवकारस्या
पक्षेतरत्वस्यव्याप्यतर्भावव्यवच्छेदः तस्यतदंतर्भावेपक्षतावच्छेदकावच्छिन्नभेदानात्मकत्वेनस्वादिकमादायपर्यनियमरक्षणानुपपत्तेरितिभावः
पक्षेतरस्यैवेति तथा च तदनुपाधित्वेइष्टापत्तिर्नसंभवतीतिभावः पक्षेतरेउपाधित्वसंभवइतितथाचोक्तव्याप्तिवत्वेनतत्रबाधोन्नीतपक्षेतरस्योपाधि
त्वावश्यकत्वेतस्यानुपाधित्वेइष्टापत्त्यसंभवः उपाधित्वं च न संभवतिव्यतिरेकेऽसाधारण्यादितिभावः ननु गंधप्रागभावावच्छिन्नोघटोगंधवान् पृथि
वीत्वादित्यादौबाधसत्वेनसत्प्रतिपक्षस्यापिसत्वात्तत्रव्यापकस्यसाध्यव्यापकसाध्यवत्वप्रमाविशेष्यत्वादेरप्युपाधेःसत्वान्नव्यभिचारः न च नविसा
दिमूलशंकाव्यभिचारोन्नायकत्वेनदूषकतावादिनामेवेतितत्रव्यभिचारोपपत्तिः तन्मतेसाधनाव्यापकत्वस्यलक्षणेप्रवेशेनतत्रोपाधेरसंभवादितिवच्यं
सत्प्रतिपक्षोन्नायकत्वेनदूषकत्वएवबाधोन्नीतपक्षेतरेव्यतिरेकेऽसाधारण्येनाव्याप्तितनेननविसादिमूल- किंतुस्वरुद्धाराप्येवप्रदूषकत्वेनतस्यव्य
भिचारोन्नायकतावादितासंभवादतः स्थलांतरमाह प्रसिद्धस्येति प्रसिद्धस्यमहानसीयवह्न्यादेर्बाधादितिपाठः असाधकेवह्नित्वेनमहानसीयवह्ने
रसाधकेउपदर्शितगंधसाध्यकेबाधस्यस्फुटत्वेपिवह्निसाधकेतस्यास्फुटतयातदुपपादनायप्रत्यासाधकइत्युक्तिः बाधसत्वेपिगंधप्रागभावाव

भ.प्र. छिन्नघटवृत्तिगंधाभावात्मकस्य पर्वतवृत्तिमहानसीयवन्ह्याद्यभावात्मकस्य बाधस्य सत्वेपि दिधितौ बाधत्वात् बाधपदार्थतया प्रकृतनियमघटकता
१६ त तथाच बाधसामान्यबोधकस्यापि बाधपदस्य प्रकृते प्रतियोगिव्यधिकरणोक्षादिबाधविशेषपरतयोपदर्शितस्य लेबाधांतरसत्वेपि प्रकृत
नियमप्रविष्टबाधविशेषाभावान्न व्यभिचार इत्याशयः व्याख्यायां संकोचेति बाधविशेषविषयकत्वस्वरूपसंकोचेत्यर्थः आह बाधसामान्यस्यैव
बाधपदार्थत्वमभ्युपेत्य व्यभिरोचोभावमाह अस्यं संकीर्णबाधानभ्युपगमात् उपदर्शितस्य स्वीयपक्षवृत्तिसाध्याभावस्य हेत्वाभासविभाजकोपा
या धिविशेषरूपधत्वानभ्युपगमात् तादृशबाधत्वस्य प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वघटितत्वात् तदभावेन तत्स्वसंभवादि
तिभावः अत एवात्र तदनभ्युपगमादेतिद्वितीयकल्पेपि उक्तनियमे बाधघटकसाध्याभावे प्रतियोगिवैयधिकरण्यंविशेषणाभावरूपकं अन्यथा
संयोगसंबंधेनद्रव्यसाध्याव्याप्यवृत्तित्वमते वन्हिमान्धूमादित्यादौ हेत्वाबाधितहेतुमत्पक्षकानुमितौ व्यभिचारापत्तेः तथाच कथं साध्याभावे प्र
तियोगिवैयधिकरण्यविशेषणमदत्वा द्वितीयकल्पः कृत इति पूर्वपक्षोपि निरस्तः केचित्तु द्वितीयकल्पे अनुमितिविबंधकीभूतज्ञानेविषयता
संबंधेनावच्छेदकीभूतादृशविशेषणताविशिष्टसाध्याभावस्तादृशविशेषणताविशिष्टसाध्याभावात्मकबाधस्यैव नियमघटकतया निवेशेन तु रामः
गापि व्यभिचारानवकाश इत्याहुः ननु अवच्छेदकावच्छेदेनानुमितिविरोधितयानत्संभवमेवेसत आह पक्षतावच्छेदकेति तथाचावच्छेदकावच्छेद १६

नानुमितेरनंगीकारात्तत्तद्विरोधितया न तत्संभवइति भावः वह्निसाधकेतदसंभवमुपपादयति समानप्रकारकेति लाघवप्रतिसंधानजन्यमाव्याप
कतानवच्छेदकमहानसीयवह्नित्वादिनात्तदनुमितेर्विरोधितयैव तत्संभवः स्यादत आह सद्धेतुलिंगपरामर्शस्येति तेन तत्सद्धेतुलिंगपरामर्शात्तथानुमितीति
महानसीयवह्नित्वेन तदनुमितीत्यर्थः लाघवप्रतिसंधानादपि व्यापकतानवच्छेदकरूपेणाव्यापकस्यानंगीकारादिति भावः नन्वेतेजस्त्वप्रका
रकप्रमाविषयत्वभास्वररूपप्रभृत्वादेरुपाधेस्तत्त्वेनाभ्युपगंतुं तत्त्वं विनेत्यादिकं मूलमसंगतमत आह दीधितौ नत्समशीलत्वं विनेति तथा चातेजस्त्वप्रकारक
प्रमाविषयत्वादेरप्तेजस्त्वसमशीलत्वात्तदुक्तासंगतिरिति भावः व्याख्याबीजं स्वयमेवाह नेनेत्यादिना गुरुत्वादेरपि कथं चिद्भतेजस्त्वसमशीलतया
ऽप्युद्भूतसाध्येत्यादिकमनर्थकमत आह व्याख्यायां व्यसाधारणोत्सादिना तु महदुद्भूतसाध्यव्यापकोपाधिमात्रस्यैव तेजोमात्रस्येत्यादिना मूलोक्तपरिशे
षासंगतिरत आह इत्थं चेति नविति निश्चितसाध्यवत्त्वस्य साध्यप्रकारकनिश्चयविषयीभूतसाध्यवत्त्वरूपतया द्विधासाध्यप्रवेशगौरवादिति
भावः अनुद्भूतरूपेति अनुद्भूतरूपवत्त्वं यद्यनुधावनमित्यर्थः सपक्षसिद्धिमिति सपक्षे व्याप्तिग्रहकसाध्यनिश्चयप्रसिद्धिमित्यर्थः उक्तमनिश्च
यानुसरणमिति तेजस्त्वनिश्चयमात्रेणापि उद्भूततया निश्चितो घटत्वासमर्थके नयत्रीव्योम्नि गमिसनेन च तस्याभावादिति भावः निश्चितसाध्यतदभाववद्व
त्तित्वेतितथा चापतीतस्य साधेरप्युपमेवार्थः अन्यथा सपक्षस्याव्यंतत्वादिघटितासाधारणपशंकायामुपक्रमेणैव तत्समाधानासंगतेरिति भावः॥

अ॰ प्र॰ तथानुसरणात् उक्तसत्वनिश्चयानुसरणात् केचित्तु साध्यप्रसिद्ध्यर्थं उक्तसत्वनिश्चयानुसरणमित्याहुस्तन्न तन्नाशादेव तत्प्रसिद्धिसंभवे धीरूपो व्यानु
१७ धावनवैयर्थ्यात् ये देशादिनं च पक्षमात्र इति तु स्यासाधारणत्वेपि पक्षत्वस्य संदिग्धकत्वरूपतया साध्यसंदेहाभावकाले एवासाधारणाभावा
द्दीधितौ तत्पक्षेतरस्य सत्वेपि पक्षे व्यापकत्वसंभवादुपाधित्वसंभवेन किंचैवमिति मूलासंगतिरिति वाच्यं तदानीं पक्षत्वाभावादेव सत्वेपि पक्षे
व्यापकतासंभवात् व्याप्तिग्रहेति अन्वयव्याप्तिग्रहे तत्र्थः दीधितौ साध्यसहचारग्रहप्रतिबंधनेति सपक्षव्यावृत्तत्वस्यासाधारणपदघटकत्वादिति भाव
ः आख्यायाम् असाधारणेति असाधारणहेतौ यो व्यतिरेकव्याप्तिग्रहस्तत्र विशेषादित्यर्थः असाधारणस्य सपक्षविपक्षव्यावृत्तत्वरूपतया साध्याभा
वव्यतिरेकं सहचारज्ञानरूपेण सपक्षव्यावृत्तत्वांशज्ञानेन हेतौ साध्यव्यापकीभूताभावप्रतियोगित्वरूपसाध्याभावव्यतिरेकव्याप्तिग्रहात् साध्यव्यतिरेकसह
चारज्ञानरूपेणापि पक्षव्यावृत्तत्वांशज्ञानेन हेतौ साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपसाध्यव्याप्तिग्रहाद्धेति भावः नचैवमेतदादितो ध्वस्तादिसंतम
स इति मूलार्थ एतन्मूलस्यार्थः इह पक्षेतरव्यतिरेके सत्प्रतिपक्षः यथा वह्निव्यापकतया गृहीतस्य पक्षेतरत्वस्य व्यतिरेकात् तदन्यभावः साध्यते तथा वह्न्य
भावव्यापकतया गृहीतस्य पक्षेतरत्वस्य व्यतिरेकात्तदन्यभावस्याप्यभावो वह्निः साध्यतामिति सत्प्रतिपक्षेः सत्प्रतिपक्षानवकाशादिति पर्वतो वह्निमान् राम॰
धूमादिति स्थापनानुमानेनैव वह्निसाधनसमाप्तत्वादिति भावः उपाधेरिति इयांश्च पंचमीयत्वतोपि साधारणाधर्मादितो विशेषापातत्वात् व्यभिचार १७

त्वरूपसाध्याभाववत्त्वादिति भावः तदिति तदाश्रयत्वावच्छेदेन पक्षत्वं न सम्भवतीति पर्

संशयोत्पादात् अप्रयोजकेति उपाधिभिन्ने व्यभिचारशंकाजनकत्वे सत्यर्थः व्यभिचारशंकाविशेषजनकत्वावच्छेदसंभवाद्दूषकतानुपयोगाच्चेति उपाधेर्व्यभि
चारसंशयाधायकत्वेनैव दूषकत्वे अनुपयोगादित्यर्थः भिन्नक्रमं स्वस्य तत्त्यागेनान्यत्रान्वयं तद्विशेषेति पक्षेतरविशेषे इत्यर्थः पक्षतायां संदिग्धसाध्यक
त्वरूपपक्षत्वे अप्रसक्तमिति परमाणोर्द्व्यणुकस्य सकर्तृकं कर्म्यातोः संदिग्धसाध्यकत्वेन निश्चितसाध्याभाववत्त्वरूपविपक्षत्वासंभवादिति भावः तत्त्वे
